ओं नमः परमात्मने श्री महागणपतये नमः

श्री गुरुभ्यो नमः

ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## द्वितीय काण्डे, द्वितीयः प्रश्नः

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2021**

1. This replaces the earlier version 1.0 dated August 31, 2021.

2. We have listened to the Krama Paaraayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till October 15, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated July 09, 2018 |
| 2nd | Version Number | 1.0 dated Aug 31, 2021 |

# Table of Contents

2. कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः .................................... 4

2.2 द्वितीय काण्डे द्वितीयः प्रश्नः – इष्टिविधानं ................................ 4

================================

ओं नमः परमात्मने श्री महागणपतये नमः

श्री गुरुभ्यो नमः हरिः ओं

## 2.कृष्ण यजुर्वेदीय तैत्तिरीय संहिता क्रम पाठः

## 2.2 द्वितीय काण्डे द्वितीयः प्रश्नः – इष्टिविधानं

### T.S. 2.2.1.1 - Kramam

प्रजापतिः प्रजाः । प्रजापतिरिति प्रजा – पतिः । प्रजा असृजत ।

प्रजा इति प्र – जाः । असृजत ताः । ताः सृष्टाः । सृष्टा इन्द्राग्नी ।

इन्द्राग्नी अप । इन्द्राग्नी इतीन्द्र – अग्नी । अपागूहताम् ।

अगूहताꣳ सः । सो ऽचायत् । अचायत् प्रजापतिः ।

प्रजापतिरिन्द्राग्नी । प्रजापतिरिति प्रजा – पतिः । इन्द्राग्नी वै ।

इन्द्राग्नी इतीन्द्र – अग्नी । वै मे । मे प्रजाः । प्रजा अप ।

प्रजा इति प्र – जाः । अपाघुक्षताम् । अघुक्षतामिति । इति सः ।

स एतम् । एतमैन्द्राग्नम् । ऐन्द्राग्न मेकादशकपालम् ।

ऐन्द्राग्नमित्यैन्द्र – अग्नम् । एकादशकपालमपश्यत् ।

एकादशकपालमित्येकादश – कपालम् । अपश्यत् तम् । तम् निः ।

निरवपत् । अवपत् तौ । तावस्मै । अस्मै प्रजाः । प्रजाः प्र ।

प्रजा इति प्र – जाः । प्रासाधयताम् । असाधयता मिन्द्राग्नी ।
इन्द्राग्नी वै । इन्द्राग्नी इतीन्द्र–अग्नी । वा एतस्य । एतस्य प्रजाम् ।
प्रजामप । प्रजामिति प्र – जाम् । अप गूहतः । गूहतो यः ।
यो ऽलम् । अलम् प्रजायै । प्रजायै सन्न् । प्रजाया इति प्र – जायै ।
सन् प्रजाम् । प्रजाम् न । प्रजामिति प्र – जाम् । न विन्दते ।
विन्दत ऐन्द्राग्नम् । ऐन्द्राग्न मेकादशकपालम् ।
ऐन्द्राग्नमित्यैन्द्र – अग्नम् । एकादशकपालम् निः ।
एकादशकपालमित्येकादश – कपालम् । निर् वपेत् । वपेत्
प्रजाकामः । प्रजाकाम इन्द्राग्नी । प्रजाकाम इति प्रजा – कामः ।
इन्द्राग्नी एव । इन्द्राग्नी इतीन्द्र–अग्नी । **1 (50/67)**

**T.S. 2.2.1.2 - Kramam**

एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति
भाग – धेयेन । उप धावति । धावति तौ । ता वेव । एवास्मै ।
अस्मै प्रजाम् । प्रजाम् प्र । प्रजामिति प्र – जाम् । प्र साधयतः ।
साधयतो विन्दते । विन्दते प्रजाम् । प्रजामैन्द्राग्नम् ।
प्रजामिति प्र – जाम् । ऐन्द्राग्नमेकादशकपालम् ।

ऐन्द्राग्नमित्यैन्द्र - अग्नम् । एकादशकपालम् निः ।
एकादशकपालमित्येकादश - कपालम् । निर् वपेत् ।
वपेथ् स्पर्द्धमानः । स्पर्द्धमानः क्षेत्रे । क्षेत्रे वा । वा सजातेषु ।
सजातेषु वा । सजातेष्विति स-जातेषु । वेन्द्राग्नी । इन्द्राग्नी एव ।
इन्द्राग्नी इतीन्द्र - अग्नी । एव स्वेन । स्वेन भागधेयेन ।
भागधेयेनोप । भागधेयेनेति भाग - धेयेन । उप धावति ।
धावति ताभ्याम् । ताभ्यामेव । एवेन्द्रियम् । इन्द्रियं ँवीर्यम् । वीर्यम्
भ्रातृव्यस्य । भ्रातृव्यस्य वृङ्क्ते । वृङ्क्ते वि । वि पाप्मना । पाप्मना
भ्रातृव्येण । भ्रातृव्येण जयते । जयते ऽप । अप वै । वा एतस्मात् ।
एतस्मादिन्द्रियम् । इन्द्रियं ँवीर्यम् । वीर्यम् क्रामति । क्रामति यः ।
यः सङ्ग्रामम् । सङ्ग्राममुपप्रयाति । सङ्ग्राममिति सं - ग्रामम् ।
उपप्रयात्यैन्द्राग्नम् । उपप्रयातीत्युप - प्रयाति ।
ऐन्द्राग्न मेकादशकपालम् । ऐन्द्राग्नमित्यैन्द्र - अग्नम् ।
एकादशकपालम् निः । एकादशकपालमित्येकादश - कपालम् ।
निर् वपेत् । **2** (**50/62**)

**T.S. 2.2.1.3 - Kramam**

वपेथ् सङ्ग्रामम् । सङ्ग्राम मुपप्रयास्यन्न् । सङ्ग्राममिति सं - ग्रामम् । उपप्रयास्यन्निन्द्राग्नी । उपप्रयास्यन्नित्युप-प्रयास्यन्न् । इन्द्राग्नी एव । इन्द्राग्नी इतीन्द्र - अग्नी । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति तौ । ता वेव । एवास्मिन्न् । अस्मिन्निन्द्रियम् । इन्द्रियं वीँर्यम् । वीर्यम् धत्तः । धत्तः सह । सहेन्द्रियेण । इन्द्रियेण वीर्येण । वीर्येणोप । उप प्र । प्र याति । याति जयति । जयति तम् । तꣳ सङ्ग्रामम् । सङ्ग्रामं वँि । सङ्ग्राममिति सं - ग्रामम् । वि वै । वा एषः । एष इन्द्रियेण । इन्द्रियेण वीर्येण । वीर्येणर्द्ध्यते । ऋद्ध्यते यः । यः सङ्ग्रामम् । सङ्ग्रामम् जयति । सङ्ग्राममिति सं - ग्रामम् । जयत्यैन्द्राग्नम् । ऐन्द्राग्नमेकादशकपालम् । ऐन्द्राग्नमित्यैन्द्र - अग्नम् । एकादशकपालम् निः । एकादशकपालमित्येकादश - कपालम् । निर् वपेत् । वपेथ् सङ्ग्रामम् । सङ्ग्रामम् जित्वा । सङ्ग्राममिति सं - ग्रामम् । जित्वेन्द्राग्नी । इन्द्राग्नी एव । इन्द्राग्नी इतीन्द्र - अग्नी ।

एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति

भाग - धेयेन । उप धावति । धावति तौ । तावेव । एवास्मिन्न् ।

अस्मिन्निन्द्रियम् । इन्द्रियं ँवीर्यं । वीर्यम् धत्तः । **3 (50/61)**

**T.S. 2.2.1.4 - Kramam**

धत्तो न । नेन्द्रियेण । इन्द्रियेण वीर्येण । वीर्येण वि । व्यृद्ध्यते ।

ऋद्ध्यतेऽप । अप वै । वा एतस्मात् । एतस्मादिन्द्रियम् । इन्द्रियं

ँवीर्यम् । वीर्यम् क्रामति । क्रामति यः । य एति । एति जनताम् ।

जनतामैन्द्राग्नम् । ऐन्द्राग्नमेकादशकपालम् ।

ऐन्द्राग्नमित्यैन्द्र - अग्नम् । एकादशकपालम् निः ।

एकादशकपालमित्येकादश - कपालम् । निर् वपेत् । वपेज्जनताम् ।

जनतामेष्यन्न् । एष्यन्निन्द्राग्नी । इन्द्राग्नी एव । इन्द्राग्नी

इतीन्द्र - अग्नी । एव स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।

भागधेयेनेति भाग - धेयेन । उप धावति । धावति तौ । तावेव ।

एवास्मिन्न् । अस्मिन्निन्द्रियम् । इन्द्रियं ँवीर्यम् । वीर्यं धत्तः ।

धत्तः सह । सहेन्द्रियेण । इन्द्रियेण वीर्येण । वीर्येण जनताम् ।

जनतामेति । एति पौष्णम् । पौष्णम् चरुम् । चरुमनु । अनु निः ।

निर् वपेत् । वपेत् पूषा । पूषा वै । वा इन्द्रियस्य ।

इन्द्रियस्य वीर्यस्य । वीर्यस्यानुप्रदाता । अनुप्रदाता पूषणम् ।

अनुप्रदातेत्यनु – प्रदाता । पूषणमेव ( ) । एव स्वेन । **4 (50/55)**

**T.S. 2.2.1.5 - Kramam**

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।

उप धावति । धावति सः । स एव । एवास्मै । अस्मा इन्द्रियम् ।

इन्द्रियं ँवीर्यम् । वीर्यमनु । अनु प्र । प्र यच्छति । यच्छति

क्षैत्रपत्यम् । क्षैत्रपत्यम् चरुम् । क्षैत्रपत्यमिति क्षैत्र – पत्यम् ।

चरुम् निः । निर् वपेत् । वपेज्जनताम् । जनतामागत्य । आगत्येयम् ।

आगत्येत्या – गत्य । इयं ँवै । वै क्षेत्रस्य । क्षेत्रस्य पतिः ।

पतिरस्याम् । अस्यामेव । एव प्रति । प्रति तिष्ठति । तिष्ठत्यैन्द्राग्नम् ।

ऐन्द्राग्नमेकादशकपालम् । ऐन्द्राग्नमित्यैन्द्र – अग्नम् ।

एकादशकपालमुपरिष्टात् । एकादशकपालमित्येकादश – कपालम् ।

उपरिष्टान्निः । निर् वपेत् । वपेदस्याम् । अस्यामेव ।

एव प्रतिष्ठाय । प्रतिष्ठायेन्द्रियम् । प्रतिष्ठायेति प्रति – स्थाय ।

इन्द्रियं वीर्यम् । वीर्यमुपरिष्टात् । उपरिष्टादात्मन्न् । आत्मन् धत्ते ।
धत्त इति धत्ते ॥ **5** (**39/45**)

*(प्रजाकाम इन्द्राग्नी - उपप्रयात्यैन्द्राग्नमेकादशकपालं नि - वीर्यं - पूषणमे वै - कान्नचत्वारिंशच्च ) (A1)*

**T.S. 2.2.2.1 - Kramam**

अग्नये पथिकृते । पथिकृते पुरोडाशम् । पथिकृत इति पथि-कृते ।
पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।
अष्टाकपालमित्यष्टा-कपालम् । निर् वपेत् । वपेद् यः ।
यो दर्.शपूर्णमासयाजी । दर्.शपूर्णमासयाजी सन्न् ।
दर्.शपूर्णमासयाजीति दर्.शपूर्णमास - याजी । सन्नमावास्याम् ।
अमावास्यां वा । अमावास्यामित्यमा - वास्याम् । वा पौर्णमासीम् ।
पार्णमासीं वा । पार्णमासीमिति पौर्ण - मासीम् । वाऽतिपादयेत् ।
अतिपादयेत् पथः । अतिपादयेदित्यति - पादयेत् । पथो वै ।
वा एषः । एषोऽधि । अद्ध्यपथेन । अपथेनैति । एति यः ।
यो दर्.शपूर्णमासयाजी । दर्शपूर्णमासयाजी सन्न् ।
दर्.शपूर्णमासयाजीति दर्.शपूर्णमास - याजी । सन्नमावास्याम् ।

अमावास्यां ँवा । अमावास्यामित्यमा – वास्याम् । वा पौर्णमासीम् ।
पौर्णमासीं ँवा । पौर्णमासीमिति पौर्ण – मासीम् । वाऽतिपादयति ।
अतिपादयत्यग्निम् । अतिपादयतीत्यति – पादयति । अग्निमेव ।
एव पथिकृतम् । पथिकृत७ स्वेन । पथिकृतमिति पथि – कृतम् ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति सः । स एव । एवैनम् । एनमपथात् ।
अपथात् पन्थाम् । पन्थामपि । अपि नयति । नयत्यनड्वान् ।
अनड्वान् दक्षिणा । दक्षिणा वही । वही हि । ह्येषः । एष समृद्ध्यै ।
समृद्धा अग्नये । समृद्धा इति सं – ऋद्ध्यै । अग्नये व्रतपतये ।
व्रतपतये पुरोडाशम् । व्रतपतय इति व्रत – पतये । **6 (50/64)**

**T.S. 2.2.2.2 - Kramam**

पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।
अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेद् यः ।
य आहिताग्निः । आहिताग्निः सन्न् । आहिताग्निरित्याहित–अग्निः ।
सन्नव्रत्यम् । अव्रत्यमिव । इव चरेत् । चरेदग्निम् । अग्निमेव ।
एव व्रतपतिम् । व्रतपति७ स्वेन । व्रतपतिमिति व्रत – पतिम् ।

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग - धेयेन ।

उप धावति । धावति सः । स एव । एवैनम् । एनं ँव्रतम् । व्रतमा ।

आ लम्भयति । लम्भयति व्रत्यः । व्रत्यो भवति । भवत्यग्नये ।

अग्नये रक्षोघ्ने । रक्षोघ्ने पुरोडाशम् । रक्षोघ्न इति रक्षः - घ्ने ।

पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा - कपालम् । निर् वपेत् । वपेद् यम् ।

य९ रक्षा९सि । रक्षा९सि सचेरन्न् । सचेरन्नग्निम् । अग्निमेव ।

एव रक्षोहणम् । रक्षोहण९ स्वेन । रक्षोहणमिति रक्षः - हनम् ।

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग - धेयेन ।

उप धावति । धावति सः । स एव । एवास्मात् । अस्माद् रक्षा९सि ।

रक्षा९स्यप । अप हन्ति । हन्ति निशितायाम् । निशितायाम् निः ।

निशितायामिति नि - शितायाम् । निर् वपेत् ।

वपेन्निशितायाम् । **7 (50/59)**

**<u>T.S. 2.2.2.3 - Kramam</u>**

निशिताया९ हि । निशितायामिति नि - शितायाम् । हि रक्षा९सि ।

रक्षा९सि प्रेरते । प्रेरते सम्प्रेर्णानि । प्रेरत इति प्र - ईरते ।

सम्प्रेर्णान्येव । सम्प्रेर्णानीति सं–प्रेर्णानि । एवैनानि । एनानि हन्ति ।
हन्ति परिश्रिते । परिश्रिते याजयेत् । परिश्रित इति परि – श्रिते ।
याजयेद् रक्षसाम् । रक्षसामनन्ववचाराय । अनन्ववचाराय रक्षोघ्नी ।
अनन्ववचारायेत्यननु – अवचाराय । रक्षोघ्नी याज्यानुवाक्ये ।
रक्षोघ्नी इति रक्षः – घ्नी । याज्यानुवाक्ये भवतः । याज्यनुवाक्ये
इति याज्या – अनुवाक्ये । भवतो रक्षसाम् । रक्षसा॒ स्तृत्यै ।
स्तृत्या अग्नये । अग्नये रुद्रवते । रुद्रवते पुरोडाशम् । रुद्रवत
इति रुद्र – वते । पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।
अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेदभिचरन्न् ।
अभिचरन्नेषा । अभिचरन्नित्यभि – चरन्न् । एषा वै । वा अस्य ।
अस्य घोरा । घोरा तनूः । तनूर् यत् । यद् रुद्रः । रुद्रस्तस्मै । तस्मा
एव । एवैनम् । एन मा । आ वृश्चति । वृश्चति ताजक् । ताजगार्तिम् ।
आर्तिमा । आर्च्छति । ऋच्छत्यग्नये । अग्नये सुरभिमते । सुरभिमते
पुरोडाशम् । सुरभिमत इति सुरभि – मते । पुरोडाशमष्टाकपालम् ।
अष्टाकपालम् निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् ।

वपेद् यस्य । यस्य गावः । गावो वा । वा पुरुषाः ।
पुरुषा वा । **8** (**50/62**)

**T.S. 2.2.2.4 - Kramam**

वा प्रमीयेरन्न् । प्रमीयेरन्॒ यः । प्रमीयेरन्निति प्र – मीयेरन्न् । यो वा ।
वा बिभीयात् । बिभीयादेषा । एषा वै । वा अस्य । अस्य भेषज्या ।
भेषज्या तनूः । तनूर् यत् । यथ् सुरभिमती । सुरभिमती तया ।
सुरभिमतीति सुरभि – मती । तयैव । एवास्मै । अस्मै भेषजम् ।
भेषजम् करोति । करोति सुरभिमते । सुरभिमते भवति । सुरभिमत
इति सुरभि – मते । भवति पूतीगन्धस्य । पूतीगन्धस्यापहत्यै ।
पूतीगन्धस्येति पूति – गन्धस्य । अपहत्या अग्नये । अपहत्या
इत्यप – हत्यै । अग्नये क्षामवते । क्षामवते पुरोडाशम् । क्षामवत
इति क्षाम – वते । पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।
अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेथ् सङ्ग्रामे ।
सङ्ग्रामे समँयत्ते । सङ्ग्राम इति सं – ग्रामे । समँयत्ते भागधेयेन ।
समँयत्त इति सं–यत्ते । भागधेयेनैव । भागधेयेनेति भाग – धेयेन ।
एवैनम् । एनꣳ शमयित्वा । शमयित्वा परान् । परानभि । अभि निः ।

निर् दिशति । दिशति यम् । यमवरेषाम् । अवरेषां ँविद्ध्यन्ति ।
विद्ध्यन्ति जीवति । जीवति सः । स यम् । यम् परेषाम् । परेषाम् प्र ।
प्र सः । स मीयते । मीयते जयति । जयति तम् । त७ँ सङ्ग्रामम् ।
सङ्ग्राममभि । सङ्ग्राममिति सं – ग्रामम् । **9** (**50/61**)

**T.S. 2.2.2.5 - Kramam**

अभि वै । वा एषः । एष एतान् । एतानुच्यति । उच्यति येषाम् ।
येषाम् पूर्वापराः । पूर्वापरा अन्वञ्चः । पूर्वापरा इति पूर्व–अपराः ।
अन्वञ्चः प्रमीयन्ते । प्रमीयन्ते पुरुषाहुतिः ।
प्रमीयन्त इति प्र – मीयन्ते । पुरुषाहुतिर्. हि । पुरुषाहुतिरिति
पुरुष – आहुतिः । ह्यस्य । अस्य प्रियतमा । प्रियतमाऽग्नये ।
प्रियतमेति प्रिय – तमा । अग्नये क्षामवते । क्षामवते पुरोडाशम् ।
क्षामवत इति क्षाम – वते । पुरोडाशमष्टाकपालम् । अष्टाकपालम्
निः । अष्टाकपालमित्यष्टा–कपालम् । निर् वपेत् । वपेद् भागधेयेन ।
भागधेयेनैव । भागधेयेनेति भाग–धेयेन । एवैनम् । एन७ँ शमयति ।
शमयति न । नैषाम् । एषाम् पुरा । पुरा ऽऽयुषः । आयुषो ऽपरः ।
अपरः प्र । प्र मीयते । मीयतेऽभि । अभि वै । वा एषः । एष एतस्य ।

एतस्य गृहान् । गृहानुच्यति । उच्यति यस्य । यस्य गृहान् ।

गृहान् दहति । दहत्यग्नये । अग्नये क्षामवते । क्षामवते पुरोडाशम् ।

क्षामवत इति क्षाम – वते । पुरोडाशमष्टाकपालम् । अष्टाकपालम्

निः । अष्टाकपालमित्यष्टा–कपालम् । निर् वपेत् । वपेद् भागधेयेन ।

भागधेयेनैव । भागधेयेनेति भाग–धेयेन । एवैनम् । एनꣳ शमयति ।

शमयति न ( ) । नास्य । अस्यापरम् । अपरम् गृहान् ।

गृहान् दहति । दहतीति दहति ॥ **10 (54/64)**

***(व्रतपतये – निशितायां निर्वपेत् – पुरुषाः – संग्रामं – न – चत्वारि च) (A2)***

**<u>T.S. 2.2.3.1 - Kramam</u>**

अग्नये कामय । कामाय पुरोडाशम् । पुरोडाशमष्टाकपालम् ।

अष्टाकपालम् निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् ।

वपेद् यम् । यम् कामः । कामो न । नोपनमेत् । उपनमेदग्निम् ।

उपनमेदित्युप – नमेत् । अग्निमेव । एव कामम् । कामꣳ स्वेन ।

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।

उप धावति । धावति सः । स एव । एवैनम् । एनम् कामेन ।

कामेन सम् । समर्द्धयति । अर्द्धयत्युप । उपैनम् । एनम् कामः ।

कामो नमति । नमत्यग्नये । अग्नये यविष्ठाय । यविष्ठाय पुरोडाशम् ।

पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेथ् स्पर्द्धमानः ।

स्पर्द्धमानः क्षेत्रे । क्षेत्रे वा । वा सजातेषु । सजातेषु वा ।

सजातेष्विति स – जातेषु । वा ऽग्निम् । अग्निमेव । एव यविष्ठम् ।

यविष्ठ७ स्वेन । स्वेन भागधेयेन । भागधेयेनोप ।

भागधेयेनेति भाग – धेयेन । उप धावति । धावति तेन । तेनैव ।

एवेन्द्रियम् । इन्द्रियं ँवीर्यम् । वीर्यम् भ्रातृव्यस्य ।

भ्रातृव्यस्य युवते । **11 (50/56)**

**T.S. 2.2.3.2 - Kramam**

युवते वि । वि पाप्मना । पाप्मना भ्रातृव्येण । भ्रातृव्येण जयते ।

जयते ऽग्नये । अग्नये यविष्ठाय । यविष्ठाय पुरोडाशम् ।

पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेदभिचर्यमाणः ।

अभिचर्यमाणो ऽग्निम् । अभिचर्यमाण इत्यभि – चर्यमाणः ।

अग्निमेव । एव यविष्ठम् । यविष्ठ॒ स्वेन । स्वेन भागधेयेन ।

भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति । धावति

सः । स एव । एवास्मात् । अस्माद् रक्षा॑ँसि । रक्षा॑ँसि यवयति ।

यवयति न । नैनम् । एनमभिचरन्न् । अभिचरन्थ् स्तृणुते ।

अभिचरन्नित्यभि – चरन्न् । स्तृणुते ऽग्नये । अग्नय आयुष्मते ।

आयुष्मते पुरोडाशम् । पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा–कपालम् । निर् वपेत् । वपेद् यः । यः कामयेत ।

कामयेत सर्वम् । सर्वमायुः । आयुरियाम् । इयामिति । इत्यग्निम् ।

अग्निमेव । एवायुष्मन्तम् । आयुष्मन्त॒ स्वेन । स्वेन भागधेयेन ।

भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति ।

धावति सः । स एव । एवास्मिन्न् । अस्मिन्नायुः । **12** (**50/56**)

**T.S. 2.2.3.3 - Kramam**

आयुर् दधाति । दधाति सर्वम् । सर्वमायुः । आयुरेति । एत्यग्नये ।

अग्नये जातवेदसे । जातवेदसे पुरोडाशम् । जातवेदस इति

जात – वेदसे । पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेद् भूतिकामः ।

भूतिकामो ऽग्निम् । भूतिकाम इति भूति – कामः । अग्निमेव ।
एव जातवेदसम् । जातवेदस॰ स्वेन । जातवेदसमिति
जात – वेदसम् । स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति
भाग – धेयेन । उप धावति । धावति सः । स एव । एवैनम् । एनम्
भूतिम् । भूतिम् गमयति । गमयति भवति । भवत्येव । एवाग्नये ।
अग्नये रुक्मते । रुक्मते पुरोडाशम् । पुरोडाशमष्टाकपालम् ।
अष्टाकपालम् निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् ।
वपेद् रुक्कामः । रुक्कामोऽग्निम् । रुक्काम इति रुक्–कामः ।
अग्निमेव । एव रुक्मन्तम् । रुक्मन्त॰ स्वेन । स्वेन भागधेयेन ।
भागधेयेनोप । भागधेयेनेति भाग–धेयेन । उप धावति । धावति सः ।
स एव । एवास्मिन्न् । अस्मिन् रुचम् । रुचम् दधाति । दधाति रोचते ।
रोचत एव । एवाग्नये । अग्नये तेजस्वते । तेजस्वते पुरोडाशम् ( ) ।
पुरोडाशमष्टाकपालम् । **13 (50/58)**

**T.S. 2.2.3.4 - Kramam**

अष्टाकपालम् निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् ।

वपेत् तेजस्कामः । तेजस्कामोऽग्निम् । तेजस्काम इति

तेजः – कामः । अग्निमेव । एव तेजस्वन्तम् । तेजस्वन्तꣳ स्वेन ।

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।

उप धावति । धावति सः । स एव । एवास्मिन्न् । अस्मिन् तेजः ।

तेजो दधाति । दधाति तेजस्वी । तेजस्व्येव । एव भवति ।

भवत्यग्नये । अग्नये साहन्त्याय । साहन्त्याय पुरोडाशम् ।

पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेथ् सीक्षमाणः ।

सीक्षमाणोऽग्निम् । अग्निमेव । एव साहन्त्यम् । साहन्त्यꣳ स्वेन ।

स्वेन भागधेयेन । भागधेयेनोप । भागदेयेनेति भाग – धेयेन ।

उप धावति । धावति तेन । तेनैव । एव सहते । सहते यम् ।

यꣳ सीक्षते । सीक्षत इति सीक्षते ॥ **14 (38/43)**

***(भ्रातृव्यस्या – स्मिन् – तेजस्वते पुरोडाश – मष्टात्रिꣳशच्च)***

*(A3)*

**T.S. 2.2.4.1 Kramam**

अग्नये ऽन्नवते । अन्नवते पुरोडाशम् । अन्नवत इत्यन्न – वते ।
पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।
अष्टाकपालमित्यष्टा–कपालम् । निर् वपेत् । वपेद् यः । यः कामयेत ।
कामयेतान्नवान् । अन्नवान्थ् स्याम् । अन्नवानित्यन्न – वान् ।
स्यामिति । इत्यग्निम् । अग्निमेव । एवान्नवन्तम् । अन्नवन्त७ स्वेन ।
अन्नवन्तमित्यन्न – वन्तम् । स्वेन भागधेयेन । भागधेयेनोप ।
भागधेयेनेति भाग – धेयेन । उप धावति । धावति सः । स एव ।
एवैनम् । एनमन्नवन्तम् । अन्नवन्तम् करोति ।
अन्नवन्तमित्यन्न – वन्तम् । करोत्यन्नवान् । अन्नवानेव ।
अन्नवानित्यन्न – वान् । एव भवति । भवत्यग्नये । अग्नये ऽन्नादाय ।
अन्नादाय पुरोडाशम् । अन्नादायेत्यन्न – अदाय ।
पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।
अष्टाकपालमित्यष्टा–कपालम् । निर् वपेत् । वपेद् यः । यः कामयेत ।
कामयेतान्नादः । अन्नादः स्याम् । अन्नाद इत्यन्न–अदः ।

स्यामिति । इत्यग्निम् । अग्निमेव । एवान्नादम् । अन्नाद॰ स्वेन ।
अन्नादमित्यन्न – अदम् । स्वेन भागधेयेन । भागधेयेनोप ।
भागधेयेनेति भाग – धेयेन । उप धावति । धावति सः । स एव ।
एवैनम् । एनमन्नादम् । अन्नादम् करोति । अन्नादमित्यन्न – अदम् ।
करोत्यन्नादः । अन्नाद एव । अन्नाद इत्यन्न – अदः । **15** (**50/64**)

**T.S. 2.2.4.2 - Kramam**

एव भवति । भवत्यग्नये । अग्नये ऽन्नपतये । अन्नपतये पुरोडाशम् ।
अन्नपतय इत्यन्न – पतये । पुरोडाशमष्टाकपालम् । अष्टाकपालम्
निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेद् यः ।
यः कामयेत । कामयेतान्नपतिः । अन्नपतिः स्याम् ।
अन्नपतिरित्यन्न – पतिः । स्यामिति । इत्यग्निम् । अग्निमेव ।
एवान्नपतिम् । अन्नपति॰ स्वेन । अन्नपतिमित्यन्न – पतिम् ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति सः । स एव । एवैनम् । एनमन्नपतिम् ।
अन्नपतिम् करोति । अन्नपतिमित्यन्न – पतिम् । करोत्यन्नपतिः ।
अन्नपतिरेव । अन्नपतिरित्यन्न – पतिः । एव भवति । भवत्यग्नये ।

अग्नये पवमानाय । पवमानाय पुरोडाशम् । पुरोडाशमष्टाकपालम् ।
अष्टाकपालम् निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् ।
वपेदग्नये । अग्नये पावकाय । पावकायाग्नये । अग्नये शुचये ।
शुचये ज्योगामयावी । ज्योगामयावी यत् । ज्योगामयावीति
ज्योक् – आमयावी । यदग्नये । अग्नये पवमानय ।
पवमानाय निर्वपति । निर्वपति प्राणम् । निर्वपतीति निः – वपति ।
प्राणमेव । प्राणमिति प्र – अनम् । एवास्मिन्न् । अस्मिन् तेन । तेन
दधाति । दधाति यत् । यदग्नये । अग्नये पावकाय । **16 (50/61)**

**<u>T.S. 2.2.4.3 - Kramam</u>**

पावकाय वाचम् । वाचमेव । एवास्मिन्न् । अस्मिन् तेन । तेन दधाति ।
दधाति यत् । यदग्नये । अग्नये शुचये । शुचय आयुः । आयुरेव ।
एवास्मिन्न् । अस्मिन् तेन । तेन दधाति । दधात्युत । उत यदि ।
यदीतासुः । इतासुर् भवति । इतासुरितीत – असुः । भवति जीवति ।
जीवत्येव । एवैताम् । एतामेव । एव निः । निर् वपेत् ।
वपेच्चक्षुष्कामः । चक्षुष्कामो यत् । चक्षुष्काम इति चक्षुः – कामः ।
यदग्नये । अग्नये पवमानाय । पवमानाय निर्वपति । निर्वपति प्राणम् ।

निर्वपतीति निः – वपति । प्राणमेव । प्राणमिति प्र – अनम् ।

एवास्मिन्न् । अस्मिन् तेन । तेन दधाति । दधाति यत् । यदग्नये ।

अग्नये पावकाय । पावकाय वाचम् । वाचमेव । एवास्मिन्न् ।

अस्मिन् तेन । तेन दधाति । दधाति यत् । यदग्नये । अग्नये शुचये ।

शुचये चक्षुः । चक्षुरेव । एवास्मिन्न् । अस्मिन् तेन । तेन दधाति ।

दधात्युत । **17 (50/54)**

**T.S. 2.2.4.4 - Kramam**

उत यदि । यद्यन्धः । अन्धो भवति । भवति प्र । प्रैव । एव पश्यति ।

पश्यत्यग्नये । अग्नये पुत्रवते । पुत्रवते पुरोडाशम् । पुत्रवत इति

पुत्र – वते । पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेदिन्द्राय ।

इन्द्राय पुत्रिणे । पुत्रिणे पुरोडाशम् । पुरोडाशमेकादशकपालम् ।

एकादशकपालम् प्रजाकामः । एकादशकपालमित्येकादश–कपालम् ।

प्रजाकामो ऽग्निः । प्रजाकाम इति प्रजा – कामः । अग्निरेव ।

एवास्मै । अस्मै प्रजाम् । प्रजाम् प्रजनयति । प्रजामिति प्र – जाम् ।

प्रजनयति वृद्धाम् । प्रजनयतीति प्र – जनयति । वृद्धामिन्द्रः ।

इन्द्रः प्र । प्र यच्छति । यच्छत्यग्नये । अग्नये रसवते ।
रसवतेऽजक्षीरे । रसवत इति रस – वते । अजक्षीरे चरुम् ।
अजक्षीर इत्यज – क्षीरे । चरुम् निः । निर् वपेत् । वपेद् यः ।
यः कामयेत । कामयेत रसवान् । रसवान्थ् स्याम् ।
रसवानिति रस – वान् । स्यामिति । इत्यग्निम् । अग्निमेव ।
एव रसवन्तम् । रसवन्त॒ꣳ स्वेन । रसवन्तमिति रस – वन्तम् ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति सः । स एव । एवैनम् । एन॒ꣳ रसवन्तम् ।
रसवन्तम् करोति । रसवन्तमिति रस – वन्तम् ।
करोति रसवान् । **18 (50/62)**

**T.S. 2.2.4.5 - Kramam**

रसवानेव । रसवानिति रस – वान् । एव भवति । भवत्यजक्षीरे ।
अजक्षीरे भवति । अजक्षीर इत्यज – क्षीरे । भवत्याग्नेयी ।
आग्नेयी वै । वा एषा । एषा यत् । यदजा । अजा साक्षात् ।
साक्षादेव । साक्षादिति स – अक्षात् । एव रसम् । रसमव ।
अव रुन्धे । रुन्धेऽग्नये । अग्नये वसुमते । वसुमते पुरोडाशम् ।

वसुमत इति वसु – मते । पुरोडाशमष्टाकपालम् । अष्टाकपालम्
निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेद् यः ।
यः कामयेत । कामयेत वसुमान् । वसुमान्थ् स्याम् ।
वसुमानिति वसु – मान् । स्यामिति । इत्यग्निम् । अग्निमेव ।
एव वसुमन्तम् । वसुमन्त७ स्वेन । वसुवन्तमिति वसु – मन्तम् ।
स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन ।
उप धावति । धावति सः । स एव । एवैनम् । एनं ँवसुमन्तम् ।
वसुमन्तम् करोति । वसुमन्तमिति वसु–मन्तम् । करोति वसुमान् ।
वसुमानेव । वसुमानिति वसु – मान् । एव भवति । भवत्यग्नये ।
अग्नये वाजसृते । वाजसृते पुरोडाशम् । वाजसृत इति
वाज – सृते । पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।
अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेथ् सङ्ग्रामे ।
सङ्ग्रामे समँयत्ते । सङ्ग्राम इति सं – ग्रामे । समँयत्ते वाजम् ।
समँयत्त इति सं – यत्ते । वाजं ँवै । **19 (50/64)**

**T.S. 2.2.4.6 - Kramam**

वा एषः । एष सिसीर्.षति । सिसीर्.षति यः । यः सङ्ग्रामम् ।

सङ्ग्रामम् जिगीषति । सङ्ग्राममिति सं - ग्रामम् । जिगीषत्यग्निः ।

अग्निः खलु । खलु वै । वै देवानाम् । देवानां ँवाजसृत् ।

वाजसृदग्निम् । वाजसृदिति वाज - सृत् । अग्निमेव ।

एव वाजसृतम् । वाजसृत७ स्वेन । वाजसृतमिति वाज - सृतम् ।

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग - धेयेन ।

उप धावति । धावति धावति । धावति वाजम् । वाज७ँ हन्ति ।

हन्ति वृत्रम् । वृत्रम् जयति । जयति तम् । त७ँ सङ्ग्रामम् ।

सङ्ग्राममथो । सङ्ग्राममिति सं - ग्रामम् । अथो अग्निः ।

अथो इत्यथो । अग्निरिव । इव न । न प्रतिधृषे । प्रतिधृषे भवति ।

प्रतिधृष इति प्रति - धृषे । भवत्यग्नये । अग्नये ऽग्निवते ।

अग्निवते पुरोडाशम् । अग्निवत इत्यग्नि - वते ।

पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा - कपालम् । निर् वपेत् । वपेद् यस्य ।

यस्याग्नौ । अग्नावग्निम् । अग्निमभ्युद्धरेयुः । अभ्युद्धरेयुर् निर्दिष्टभागः । अभ्युद्धरेयुरित्यभि – उद्धरेयुः । निर्दिष्टभागो वै । निर्दिष्टभाग इति निर्दिष्ट – भागः । वा एतयोः । एतयोरन्यः । अन्योऽनिर्दिष्टभागः । अनिर्दिष्टभागो ऽन्यः । अनिर्दिष्टभाग इत्यनिर्दिष्ट – भागः । अन्यस्तौ । तौ संभवन्तौ । संभवन्तौ यजमानम् । संभवन्ताविति सं – भवन्तौ । यजमानमभि । **20** (**50/63**)

**T.S. 2.2.4.7 - Kramam**

अभि सम् । सं भवतः । भवतः सः । स ईश्वरः । ईश्वर आर्तिम् । आर्तिमार्तोः । आर्तोर् यत् । आर्तोरित्या – अर्तोः । यदग्नये । अग्नये ऽग्निवते । अग्निवते निर्वपति । अग्निवत इत्यग्नि – वते । निर्वपति भागधेयेन । निर्वपतीति निः – वपति । भागधेयेनैव । भागधेयेनेति भाग – धेयेन । एवैनौ । एनौ शमयति । शमयति न । नार्तिम् । आर्तिमा । आर्च्छति । ऋच्छति यजमानः । यजमानोऽग्नये । अग्नये ज्योतिष्मते । ज्योतिष्मते पुरोडाशम् । पुरोडाशमष्टाकपालम् । अष्टाकपालम् निः । अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् ।

वपेद् यस्य । यस्याग्निः । अग्निरुद्धृतः । उद्धृतो ऽहुते ।
उद्धृत इत्युत् – हृतः । अहुते ऽग्निहोत्रे । अग्निहोत्र उद्वायेत् ।
अग्निहोत्र इत्यग्नि – होत्रे । उद्वायेदपरः । उद्वायेदित्युत् – वायेत् ।
अपर आदीप्य । आदीप्यानूद्धृत्यः । आदीप्येत्या – दीप्य ।
अनूद्धृत्य इति । अनूद्धृत्य इत्यनु–उद्धृत्यः । इत्याहुः । आहुस्तत् ।
तत् तथा । तथा न । न कार्यम् । कार्यँ यत् । यद् भागधेयम् ।
भागधेयमभि । भागधेयमिति भाग – धेयम् । अभि पूर्वः ।
पूर्व उद्ध्रियते । उद्ध्रियते किम् । उद्ध्रियत इत्युत् – ह्रियते ।
किमपरः । अपरोऽभि । अभ्युत् । उद्ध्रियेत । **21 (50/62)**

**T.S. 2.2.4.8 - Kramam**

ह्रियेतेति । इति तानि । तान्येव । एवावक्षाणानि । अवक्षाणानि
सन्निधाय । अवक्षाणानीत्यव – क्षाणानि । सन्निधाय मन्थेत् ।
सन्निधायेति सं – निधाय । मन्थेदितः । इतः प्रथमम् । प्रथमम्
जज्ञे । जज्ञे अग्निः । अग्निः स्वात् । स्वाद् योनेः । योनेरधि ।
अधि जातवेदाः । जातवेदा इति जात – वेदाः । स गायत्रिया ।

गायत्रिया त्रिष्टुभा । त्रिष्टुभा जगत्या । जगत्या देवेभ्यः । देवेभ्यो हव्यम् । हव्यं ँ वहतु । वहतु प्रजानन्न् । प्रजानन्निति । प्रजानन्निति प्र – जानन्न् । इति छन्दोभिः । छन्दोभिरेव । छन्दोभिरिति छन्दः – भिः । एवैनम् । एन७ स्वात् । स्वाद् योनेः । योनेः प्र । प्र जनयति । जनयत्येषः । एष वाव । वाव सः । सोऽग्निः । अग्निरिति । इत्याहुः । अहुर् ज्योतिः । ज्योतिस्तु । त्वै । वा अस्य । अस्य परापतितम् । परापतितमिति । परापतितमिति परा – पतितम् । इति यत् । यदग्नये । अग्नये ज्योतिष्मते । ज्योतिष्मते निर्वपति । निर्वपति यत् । निर्वपतीति निः – वपति । यदेव । एवास्य ( ) । अस्य ज्योतिः । ज्योतिः परापतितम् । परापतितम् तत् । परापतितमिति परा – पतितम् । तदेव । एवाव । अव रुन्धे । रुन्ध इति रुन्धे ॥ **22** (**56/63**)

***(करोत्यन्नादो – दधाति यदग्नये – शुचये चक्षुरेवास्मिन् तेन दधाति – करोति – वाजं – ँयजमान – मु – देवास्य – षट्च) (A4)***

**T.S. 2.2.5.1 - Kramam**

वैश्वानरम् द्वादशकपालम् । द्वादशकपालम् निः । द्वादशकपालमिति

द्वादश - कपालम् । निर् वपेत् । वपेद् वारुणम् । वारुणम् चरुम् ।

चरुम् दधिक्राव्.ण्णे । दधिक्राव्.ण्णे चरुम् । दधिक्राव्.ण्ण इति

दधि - क्राव्.ण्णे । चरुमभिशस्यमानः । अभिशस्यमानो यत् ।

अभिशस्यमान इत्यभि - शस्यमानः । यद् वैश्वानरः ।

वैश्वानरो द्वादशकपालः । द्वादशकपालो भवति । द्वादशकपाल इति

द्वादश - कपालः । भवति सम्ँवथ्सरः । सम्ँवथ्सरो वै ।

सम्ँवथ्सर इति सम् - वथ्सरः । वा अग्निः । अग्निर् वैश्वानरः ।

वैश्वानरः सम्ँवथ्सरेण । सम्ँवथ्सरेणैव । सम्ँवथ्सरेणेति

सं - वथ्सरेण । एवैनम् । एनꣳ स्वदयति । स्वदयत्यप ।

अप पापम् । पापं ँवर्णम् । वर्णꣳ हते । हते वारुणेन । वारुणेनैव ।

एवैनम् । एनं ँवरुणपाशात् । वरुणपाशान् मुञ्चति । वरुणपाशादिति

वरुण - पाशात् । मुञ्चति दधिक्राव्.ण्णा । दधिक्राव्.ण्णा पुनाति ।

दधिक्राव्.ण्णेति दधि - क्राव्.ण्णा । पुनाति हिरण्यम् ।

हिरण्यम् दक्षिणा । दक्षिणा पवित्रम् । पवित्रं ँवै । वै हिरण्यम् ।

हिरण्यम् पुनाति । पुनात्येव । एवैनम् । एनमाद्यम् । आद्यमस्य ।
अस्यान्नम् । अन्नम् भवति । भवत्येताम् । एतामेव । एव निः ।
निर् वपेत् । वपेत् प्रजाकामः । प्रजाकामः सम्ँवथ्सरः ।
प्रजाकाम इति प्रजा - कामः । सम्ँवथ्सरो वै ।
सम्ँवथ्सर इति सं - वथ्सरः । **23 (50/60)**

**T.S. 2.2.5.2 - Kramam**

वा एतस्य । एतस्याशान्तः । अशान्तो योनिम् । योनिम् प्रजायै ।
प्रजायै पशूनाम् । प्रजाया इति प्र - जायै । पशूनाम् निः ।
निर् दहति । दहति यः । योऽलम् । अलम् प्रजायै । प्रजायै सन्न् ।
प्रजाया इति प्र - जायै । सन् प्रजाम् । प्रजाम् न । प्रजामिति
प्र - जाम् । न विन्दते । विन्दते यत् । यद् वैश्वानरः ।
वैश्वानरो द्वादशकपालः । द्वादशकपालो भवति । द्वादशकपाल इति
द्वादश - कपालः । भवति सम्ँवथ्सरः । सम्ँवथ्सरो वै ।
सम्ँवथ्सर इति सं - वथ्सरः । वा अग्निः । अग्निर् वैश्वानरः ।
वैश्वानरः सम्ँवथ्सरम् । सम्ँवथ्सरमेव । सम्ँवथ्सरमिति
सं - वथ्सरम् । एव भागधेयेन । भागधेयेन शमयति ।

भागधेयेनेति भाग–धेयेन । शमयति सः । सोऽस्मै । अस्मै शान्तः ।
शान्तः स्वात् । स्वाद् योनेः । योनेः प्रजाम् । प्रजाम् प्र । प्रजामिति
प्र – जाम् । प्र जनयति । जनयति वारुणेन । वारुणेनैव । एवैनम् ।
एनं ँवरुणपाशात् । वरुणपाशान् मुञ्चति ।
वरुणपाशादिति वरुण – पाशात् । मुञ्चति दधिक्राव्.ण्णा ।
दधिक्राव्.ण्णा पुनाति । दधिक्राव्.ण्णेति दधि – क्राव्.ण्णा ।
पुनाति हिरण्यम् । हिरण्यम् दक्षिणा । दक्षिणा पवित्रम् । पवित्रं ँवै ।
वै हिरण्यम् । हिरण्यम् पुनाति । पुनात्येव । एवैनम् ।
एनं ँविन्दते । **24** (**50/60**)

**T.S. 2.2.5.3 - Kramam**

विन्दते प्रजाम् । प्रजां ँवैश्वानरम् । प्रजामिति प्र – जाम् ।
वैश्वानरम् द्वादशकपालम् । द्वादशकपालम् निः । द्वादशकपालमिति
द्वादश–कपालम् । निर् वपेत् । वपेत् पुत्रे । पुत्रे जाते । जाते यत् ।
यदष्टाकपालः । अष्टाकपालो भवति । अष्टाकपाल इत्यष्टा–कपालः ।
भवति गायत्रिया । गायत्रियैव । एवैनम् । एनम् ब्रह्मवर्चसेन ।
ब्रह्मवर्चसेन पुनाति । ब्रह्मवर्चसेनेति ब्रह्म – वर्चसेन । पुनाति यत् ।

यन्नवकपालः । नवकपालस्त्रिवृता । नवकपाल इति नव-कपालः ।

त्रिवृतैव । त्रिवृतेति त्रि - वृता । एवास्मिन्न् । अस्मिन् तेजः ।

तेजोदधाति । दधाति यत् । यद् दशकपालः । दशकपालो विराजा ।

दशकपाल इति दश - कपालः । विराजैव । विराजेति वि-राजा ।

एवास्मिन्न् । अस्मिन्नन्नाद्यम् । अन्नाद्यम् दधाति ।

अन्नाद्यमित्यन्न - अद्यम् । दधाति यत् । यदेकादशकपालः ।

एकादशकपालस्त्रिष्टुभा । एकादशकपाल इत्येकादश - कपालः ।

त्रिष्टुभैव । एवास्मिन्न् । अस्मिन्निन्द्रियम् । इन्द्रियम् दधाति । दधाति

यत् । यद् द्वादशकपालः । द्वादशकपलो जगत्या । द्वादशकपाल इति

द्वादश - कपालः । जगत्यैव । एवास्मिन्न् । अस्मिन् पशून् । पशून्

दधाति । दधाति यस्मिन्न् । यस्मिन् जाते । जात एताम् । एतामिष्टिम् ।

इष्टिम् निर्वपति । निर्वपति पूतः । निर्वपतीति निः - वपति ।

पूत एव । **25** (**50/62**)

**<u>T.S. 2.2.5.4 - Kramam</u>**

एव तेजस्वी । तेजस्व्यन्नादः । अन्नाद इन्द्रियावी ।

अन्नाद इत्यन्न - अदः । इन्द्रियावी पशुमान् । पशुमान् भवति ।

पशुमानिति पशु – मान् । भवत्यव । अव वै । वा एषः । एष
सुवर्गात् । सुवर्गाल्लोकात् । सुवर्गादिति सुवः–गात् । लोकाच्छिद्यते ।
छिद्यते यः । यो दर्.शपूर्णमासयाजी । दर्.शपूर्णमासयाजी सन्न् ।
दर्.शपूर्णमासयाजीति दर्.शपूर्णमास – याजी । सन्नमावास्याम् ।
अमावास्यां ँवा । अमावास्यामित्यमा – वास्याम् । वा पौर्णमासीम् ।
पौर्णमासीं ँवा । पौर्णमासीमिति पौर्ण – मासीम् । वा ऽतिपादयति ।
अतिपादयति सुवर्गाय । अतिपादयतीत्यति–पादयति । सुवर्गाय हि ।
सुवर्गायेति सुवः – गाय । हि लोकाय । लोकाय दर्.शपूर्णमासौ ।
दर्शपूर्णमासा विज्येते । दर्.शपूर्णमासाविति दर्.श – पूर्णमासौ ।
इज्येते वैश्वानरम् । इज्येते इतीज्येते । वैश्वानरं द्वादशकपालम् ।
द्वादशकपालम् निः । द्वादशकपालमिति द्वादश – कपालम् ।
निर् वपेत् । वपेदमावास्याम् । अमावास्यां ँवा ।
अमावास्यामित्यमा – वास्याम् । वा पौर्णमासीम् । पौर्णमासीं ँवा ।
पौर्णमासीमिति पौर्ण – मासीम् । वा ऽतिपाद्य । अतिपाद्य
सम्ँवथ्सरः । अतिपाद्येत्यति – पाद्य । सम्ँवथ्सरो वै ।

सम्ँवथ्सर इति सं - वथ्सरः । वा अग्निः । अग्निर् वैश्वानरः ।
वैश्वानरः सम्ँवथ्सरम् । सम्ँवथ्सरमेव । सम्ँवथ्सरमिति
सं - वथ्सरम् । एव प्रीणाति । प्रीणात्यथो । अथो सम्ँवथ्सरम् ।
अथो इत्यथो । सम्ँवथ्सरमेव । सम्ँवथ्सरमिति सं - वथ्सरम् ।
एवास्मै । अस्मा उप । उप दधाति । दधाति सुवर्गस्य । सुवर्गस्य
लोकस्य । सुवर्गस्येति सुवः - गस्य । लोकस्य समष्ट्यै ।
समष्ट्या अथो । समष्ट्या इति सं - अष्ट्यै । **26 (50/70)**

**T.S. 2.2.5.5 - Kramam**

अथो देवताः । अथो इत्यथो । देवता एव । एवान्वारभ्य । अन्वारभ्य
सुवर्गम् । अन्वारभ्येत्यनु - आरभ्य । सुवर्गं ँलोकम् । सुवर्गमिति
सुवः - गम् । लोकमेति । एति वीरहा । वीरहा वै । वीरहेति
वीर - हा । वा एषः । एष देवानाम् । देवानां ँयः । योऽग्निम् ।
अग्नमुद्वासयते । उद्वासयते न । उद्वासयत इत्युत् - वासयते ।
न वै । वा एतस्य । एतस्य ब्राह्मणाः । ब्राह्मणा ऋतायवः ।
ऋतायवः पुरा । ऋतायव इत्यृत - यवः । पुराऽन्नम् । अन्नमक्षन्न् ।
अक्षन्नाग्नेयम् । आग्नेयमष्टाकपालम् । अष्टाकपालम् निः ।

अष्टाकपालमित्यष्टा – कपालम् । निर् वपेत् । वपेद् वैश्वानरम् ।
वैश्वानरम् द्वादशकपालम् । द्वादशकपालमग्निम् । द्वादशकपालमिति
द्वादश – कपालम् । अग्निमुद्वासयिष्यन्न् । उद्वासयिष्यन्न् यत् ।
उद्वासयिष्यन्नित्युत् – वासयिष्यन्न् । यदष्टाकपालः । अष्टाकपालो
भवति । अष्टाकपाल इत्यष्टा – कपालः । भवत्यष्टाक्षरा । अष्टाक्षरा
गायत्री । अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री गायत्रः । गायत्रोऽग्निः ।
अग्निर् यावान् । यावानेव । एवाग्निः । अग्निस्तस्मै ।
तस्मा आतिथ्यम् । आतिथ्यम् करोति । करोत्यथो । अथो यथा ।
अथो इत्यथो । यथा जनम् । जनं यँते । यतेऽवसम् ।
अवसम् करोति । करोति तादृक् । तादृगेव । **27 (50/62)**

**T.S. 2.2.5.6 - Kramam**

एव तत् । तद् द्वादशकपालः । द्वादशकपालो वैश्वानरः । द्वादशकपाल
इति द्वादश – कपालः । वैश्वानरो भवति । भवति द्वादश ।
द्वादश मासाः । मासाः सम्ँवथ्सरः । सम्ँवथ्सरः सम्ँवथ्सरः ।
सम्ँवथ्सर इति सं – वथ्सरः । सम्ँवथ्सरः खलु । सम्ँवथ्सर
इति सं – वथ्सरः । खलु वै । वा अग्नेः । अग्नेर् योनिः ।

योनिः स्वाम् । स्वामेव । एवैनम् । एनं ँयोनिम् । योनिम् गमयति ।

गमयत्याद्यम् । आद्यमस्य । अस्यान्नम् । अन्नं भवति ।

भवति वैश्वानरम् । वैश्वानरम् द्वादशकपालम् । द्वादशकपालम् निः ।

द्वादशकपालमिति द्वादश - कपालम् । निर् वपेत् । वपेन् मारुतम् ।

मारुत७ँ सप्तकपालम् । सप्तकपालम् ग्रामकामः । सप्तकपालमिति

सप्त - कपालम् । ग्रामकाम आहवनीये । ग्रामकाम इति

ग्राम - कामः । आहवनीये वैश्वानरम् । आहवनीय इत्या-हवनीये ।

वैश्वानरमधि । अधि श्रयति । श्रयति गार्.हपत्ये । गार्.हपत्ये

मारुतम् । गार्.हपत्य इति गार्.ह - पत्ये । मारुतम् पापवस्यसस्य ।

पापवस्यसस्य विधृत्यै । पापवस्यसस्येति पाप - वस्यसस्य ।

विधृत्यै द्वादशकपालः । विधृत्या इति वि - धृत्यै । द्वादशकपालो

वैश्वानरः । द्वादशकपाल इति द्वादश - कपालः । वैश्वानरो भवति ।

भवति द्वादश । द्वादशमासाः । मासाः सम्ँवथ्सरः । सम्ँवथ्सरः

सम्ँवथ्सरेण । सम्ँवथ्सर इति सं - वथ्सरः । सम्ँवथ्सरेणैव ।

सम्ँवथ्सरेणेति सं - वथ्सरेण । एवास्मै । अस्मै सजातान् ।

सजाता॑श्च्यावयति । सजातानि॑ति स–जातान् । च्यावयति मारुतः ।
मारुतो भ॑वति ( ) । भवति म॑रुतः । **28 (50/64)**

**T.S. 2.2.5.7 - Kramam**

मरुतो वै । वै देवानाम् । देवानां ँविशः । विशो देवविशेन ।
देवविशेनैव । देवविशेनेति देव – विशेन । एवास्मै । अस्मै
मनुष्यविशम् । मनुष्यविशमव । मनुष्यविशमिति मनुष्य – विशम् ।
अव रुन्धे । रुन्धे सप्तकपालः । सप्तकपालो भवति । सप्तकपाल
इति सप्त – कपालः । भवति सप्तगणाः । सप्तगणा वै । सप्तगणा
इति सप्त – गणाः । वै मरुतः । मरुतो गणशः । गणश एव ।
गणश इति गण – शः । एवास्मै । अस्मै सजातान् । सजातानव ।
सजातानिति स – जातान् । अव रुन्धे । रुन्धे ऽनूच्यमाने ।
अनूच्यमान आ । अनूच्यमान इत्यनु – उच्यमाने । आ सादयति ।
सादयति विशम् । विशमेव । एवास्मै । अस्मा अनुवर्त्मानम् ।
अनुवर्त्मानम् करोति । अनुवर्त्मानमित्यनु – वर्त्मानम् ।
करोतीति करोति ॥ **29 (29/37)**

*(प्रजाकामः सँवथ्सरः - पुनात्येवैनं - पूतः - समष्ट्यै - तादृङ् - मारुतो भव - त्येकान्न त्रिँ॒शच्च ) (A5)*

**T.S. 2.2.6.1 - Kramam**

आदित्यम् चरुम् । चरुम् निः । निर् वपेत् । वपेथ् सङ्ग्रामम् ।
सङ्ग्राममुपप्रयास्यन्न् । सङ्ग्राममिति सं - ग्रामम् ।
उपप्रयास्यन्नियम् । उपप्रयास्यन्नित्युप - प्रयास्यन्न् । इयं ँवै ।
वा अदितिः । अदितिरस्याम् । अस्यामेव । एव पूर्वे । पूर्वे प्रति ।
प्रति तिष्ठन्ति । तिष्ठन्ति वैश्वानरम् । वैश्वानरम् द्वादशकपालम् ।
द्वादशकपालम् निः । द्वादशकपालमिति द्वादश - कपालम् ।
निर् वपेत् । वपेदायतनम् । आयतनम् गत्वा ।
आयतनमित्या - यतनम् । गत्वा सम्ँवथ्सरः । सम्ँवथ्सरो वै ।
सम्ँवथ्सर इति सं - वथ्सरः । वा अग्निः । अग्निर् वैश्वानरः ।
वैश्वानरः सम्ँवथ्सरः । सम्ँवथ्सरः खलु । सम्ँवथ्सर इति
सं - वथ्सरः । खलु वै । वै देवानाम् । देवानामायतनम् ।
आयतनमेतस्मात् । आयतनमित्या - यतनम् । एतस्माद् वै ।
वा आयतनात् । आयतनाद् देवाः । आयतनादित्या - यतनात् ।

देवा असुरान् । असुरानजयन्न् । अजयन्. यत् । यद् वैशानरम् ।
वैश्वानरम् द्वादशकपालम् । द्वादशकपालम् निर्वपति ।
द्वादशकपालमिति द्वादश - कपालम् । निर्वपति देवानाम् ।
निर्वपतीति निः - वपति । देवानामेव । एवायतने । आयतने यतते ।
आयतन इत्या - यतने । यतते जयति । जयति तम् ।
तꣳ सङ्ग्रामम् । सङ्ग्राममेतस्मिन्न् । सङ्ग्राममिति सं - ग्रामम् ।
एतस्मिन् वै । वा एतौ । एतौ मृजाते । मृजाते यः ।
मृजाते इति मृजाते । **30** (**50/63**)

**T.S. 2.2.6.2 - Kramam**

यो विद्विषाणयोः । विद्विषाणयोरन्नम् । विद्विषाणयोरिति
वि - द्विषाणयोः । अन्नमत्ति । अत्ति वैश्वानरम् । वैश्वानरम्
द्वादशकपालम् । द्वादशकपालम् निः । द्वादशकपालमिति
द्वादश-कपालम् । निर् वपेत् । वपेद् विद्विषाणयोः । विद्विषाणयोरन्नम् ।
विद्विषाणयोरिति वि - द्विषाणयोः । अन्नम् जग्द्ध्वा । जग्द्ध्वा
सम्ँवथ्सरः । सम्ँवथ्सरो वै । सम्ँवथ्सर इति सं - वथ्सरः ।
वा अग्निः । अग्निर् वैश्वानरः । वैश्वानरः सम्ँवथ्सरस्वदितम् ।

सम्वँथ्सरस्वदितमेव ।

सम्वँथ्सरस्वदितमिति सम्वँथ्सर – स्वदितम् । एवात्ति ।

अत्ति न । नास्मिन्न् । अस्मिन् मृजाते । मृजाते सम्वँथ्सराय ।

मृजाते इति मृजाते । सम्वँथ्सराय वै । सम्वँथ्सरायेति

सं – वथ्सराय । वा एतौ । एतौ सम् । सममाते । अमाते यौ ।

अमाते इत्यमाते । यौ सममाते । सममाते तयोः । सममाते इति

सं–अमाते । तयोर् यः । यः पूर्वः । पूर्वो ऽभिदुह्यति ।

अभिदुह्यति तम् । अभिदुह्यतीत्यभि – दुह्यति । तं वँरुणः ।

वरुणो गृह्णाति । गृह्णाति वैश्वानरम् । वैश्वानरम् द्वादशकपालम् ।

द्वादशकपालम् निः । द्वादशकपालमिति द्वादश–कपालम् ।

निर् वपेत् । वपेथ् सममानयोः । सममनयोः पूर्वः । सममानयोरिति

सं – अमानयोः । पूर्वोऽभिदुह्य । अभिदुह्य सम्वँथ्सरः ।

अभिदुह्येत्यभि – दुह्य । सम्वँथ्सरो वै । सम्वँथ्सर इति

सं–वथ्सरः । वा अग्निः । अग्निर् वैश्वानरः । वैश्वानरः सम्वँथ्सरम् ।

सम्वँथ्सरमेव । सम्वँथ्सरमिति सं – वथ्सरम् । एवाप्त्वा ।

आप्त्वा निर्वरुणम् । निर्वरुणम् परस्तात् । निर्वरुणमिति

निः – वरुणम् । **31 (50/66)**

**T.S. 2.2.6.3 - Kramam**

परस्तादभि । अभि दुह्यति । दुह्यति न । नैनम् । एनं ँवरुणः । वरुणो

गृह्णाति । गृह्णात्याव्यम् । आव्यं ँवै । वा एषः । एष प्रति । प्रति गृह्णाति ।

गृह्णाति यः । योऽविम् । अविम् प्रतिगृह्णाति । प्रतिगृह्णाति वैश्वानरम् ।

प्रतिगृह्णातीति प्रति – गृह्णाति । वैश्वानरम् द्वादशकपालम् ।

द्वादशकपालम् निः । द्वादशकपालमिति द्वादश – कपालम् ।

निर् वपेत् । वपेदविम् । अविम् प्रतिगृह्य । प्रतिगृह्य सम्ँवथ्सरः ।

प्रतिगृह्येति प्रति – गृह्य । सम्ँवथ्सरो वै । सम्ँवथ्सर इति

सं – वथ्सरः । वा अग्निः । अग्निर् वैश्वानरः । वैश्वानरः

सम्ँवथ्सरस्वदिताम् । सम्ँवथ्सरस्वदितामेव । सम्ँवथ्सरस्वदितामिति

सम्ँवथ्सर – स्वदिताम् । एव प्रति । प्रति गृह्णाति । गृह्णाति न ।

नाव्यम् । आव्यम् प्रति । प्रति गृह्णाति । गृह्णात्यात्मनः । आत्मनो वै ।

वा एषः । एष मात्राम् । मात्रामाप्नोति । आप्नोति यः । य उभयादत् ।

उभयादत् प्रतिगृह्णाति । प्रतिगृह्णात्यश्वम् । प्रतिगृह्णातीति

प्रति – गृह्णाति । अश्वं ँवा । वा पुरुषम् । पुरुषं ँवा । वा वैश्वानरम् ।

वैश्वानरम् द्वादशकपालम् । दादशकपालम् निः ।

द्वादशकपालमिति द्वादश – कपालम् । निर् वपेत् । वपेदुभयादत् ।

उभयादत् प्रतिगृह्य । **32 (50/57)**

**T.S. 2.2.6.4 - Kramam**

प्रतिगृह्य सम्ँवथ्सरः । प्रतिगृह्येति प्रति – गृह्य । सम्ँवथ्सरो वै ।

सम्ँवथ्सर इति सं – वथ्सरः । वा अग्निः । अग्निर् वैश्वानरः ।

वैश्वानरः सम्ँवथ्सरस्वदितम् । सम्ँवथ्सरस्वदितमेव ।

सम्ँवथ्सरस्वदितमिति सम्ँवथ्सर – स्वदितम् । एव प्रति ।

प्रति गृह्णाति । गृह्णाति न । नात्मनः । आत्मनो मात्राम् । मात्रामाप्नोति ।

आप्नोति वैश्वानरम् । वैश्वानरम् द्वादशकपालम् । द्वादशकपालम् निः ।

द्वादशकपालमिति द्वादश – कपालम् । निर् वपेत् । वपेथ् सनिम् ।

सनिमेष्यन्न् । एष्यन्थ् सम्ँवथ्सरः । सम्ँवथ्सरो वै । सम्ँवथ्सर

इति सं – वथ्सरः । वा अग्निः । अग्निर् वैश्वानरः । वैश्वानरो यदा ।

यदा खलु । खलु वै । वै सम्ँवथ्सरम् । सम्ँवथ्सरम् जनतायाम् ।

सम्ँवथ्सरमिति सं – वथ्सरम् । जनतायाम् चरति । चरत्यथ ।

अथ सः । स धनार्घः । धनार्घो भवति । धनार्घ इति धन – अर्घः ।

भवति यत् । यद् वैशानरम् । वैश्वानरम् द्वादशकपालम् ।

द्वादशकपालम् निर्वपति । द्वादशकपालमिति द्वादश – कपालम् ।

निर्वपति सम्ँवथ्सरसाताम् । निर्वपतीति निः – वपति ।

सम्ँवथ्सरसातामेव । सम्ँवथ्सरसातामिति सम्ँवथ्सर – साताम् ।

एव सनिम् । सनिमभि । अभि प्र । प्र च्यवते । च्यवते दानकामाः ।

दानकामा अस्मै । दानकामा इति दान – कामाः । अस्मै प्रजाः ।

प्रजा भवन्ति । प्रजा इति प्र – जाः । भवन्ति यः । यो वै ।

वै सम्ँवथ्सरम् ( ) । सम्ँवथ्सरम् प्रयुज्य ।

सम्ँवथ्सरमिति सं – वथ्सरम् । **33 (50/63)**

**T.S. 2.2.6.5 - Kramam**

प्रयुज्य न । प्रयुज्येति प्र – युज्य । न विमुञ्चति ।

विमुञ्चत्यप्रतिष्ठानः । विमुञ्चतीति वि – मुञ्चति । अप्रतिष्ठानो वै ।

अपतिष्ठान इत्यप्रति – स्थानः । वै सः । स भवति । भवत्येतम् ।

एतमेव । एव वैश्वानरम् । वैश्वानरम् पुनः । पुनरागत्य ।

आगत्य निः । आगत्येत्या – गत्य । निर् वपेत् । वपेद् यम् । यमेव ।
एव प्रयुङ्क्ते । प्रयुङ्क्ते तम् । प्रयुङ्क्त इति प्र – युङ्क्ते ।
तम् भागधेयेन । भागधेयेन वि । भागधेयेनेति भाग – धेयेन ।
वि मुञ्चति । मुञ्चति प्रतिष्ठित्यै । प्रतिष्ठित्यै यया । प्रतिष्ठत्या इति
प्रति – स्थित्यै । यया रज्वा । रज्वोत्तमाम् । उत्तमाम् गाम् ।
उत्तमामित्युत् – तमाम् । गामाजेत् । आजेत् ताम् ।
आजेदित्या–अजेत् । ताम् भ्रातृव्याय । भातृव्याय प्र । प्र हिणुयात् ।
हिणुयान्निर्.ऋतिम् । निर्.ऋतिमेव । निर्.ऋतिमिति निः – ऋतिम् ।
एवास्मै । अस्मै प्र । प्र हिणोति । हिणोतीति हिणोति ॥ **34** (**36/46**)

*(मृजाते – निर्वरुणं – वँपेदुभयादद् – यो वै सँवथ्सर – षट्त्रिँ॑शच्च) (A6)*

**T.S. 2.2.7.1 - Kramam**

ऐन्द्रम् चरुम् । चरुम् निः । निर् वपेत् । वपेत् पशुकामः । पशुकाम
ऐन्द्राः । पशुकाम इति पशु – कामः । ऐन्द्रा वै । वै पशवः ।
पशव इन्द्रम् । इन्द्रमेव । एव स्वेन । स्वेन भागधेयेन ।
भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप धावति ।

धावति सः । स एव । एवास्मै । अस्मै पशून् । पशून् प्र ।
प्र यच्छति । यच्छति पशुमान् । पशुमानेव । पशुमानिति पशु–मान् ।
एव भवति । भवति चरुः । चरुर् भवति । भवति स्वात् । स्वादेव ।
एवास्मै । अस्मै योनेः । योनेः पशून् । पशून् प्र । प्र जनयति ।
जनयतीन्द्राय । इन्द्रायेन्द्रियावते । इन्द्रियावते पुरोडाशम् ।
इन्द्रियावत इतीन्द्रिय – वते । पुरोडाशमेकादशकपालम् ।
एकादशकपालम् निः । एकादशकपालमित्येकादश – कपालम् ।
निर् वपेत् । वपेत् पशुकामः । पशुकाम इन्द्रियम् । पशुकाम इति
पशु – कामः । इन्द्रियं ँवै । वै पशवः । पशव इन्द्रम् । इन्द्रमेव ।
एवेन्द्रियावन्तम् । इन्द्रियावन्त॰ स्वेन ।
इन्द्रियावन्तमितीन्द्रिय – वन्तम् । स्वेन भागधेयेन । भागधेयेनोप ।
भागधेयेनेति भाग – धेयेन । उप धावति । धावति सः ।
स एव । **35** (**50/58**)

**T.S. 2.2.7.2 - Kramam**

एवास्मै । अस्मा इन्द्रियम् । इन्द्रियम् पशून् । पशून् प्र ।
प्र यच्छति । यच्छति पशुमान् । पशुमानेव ।

पशुमानिति पशु–मान् । एव भवति । भवतीन्द्राय । इन्द्राय घर्मवते ।

घर्मवते पुरोडाशम् । घर्मवत इति घर्म – वते ।

पुरोडाशमेकादशकपालम् । एकादशकपालम् निः ।

एकादशकपालमित्येकादश – कपालम् । निर् वपेत् ।

वपेद् ब्रह्मवर्चसकामः । ब्रह्मवर्चसकामो ब्रह्मवर्चसम् ।

ब्रह्मवर्चसकाम इति ब्रह्मवर्चस – कामः । ब्रह्मवर्चसं ँवै ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । वै घर्मः । घर्म इन्द्रम् । इन्द्रमेव ।

एव घर्मवन्तम् । घर्मवन्त७ स्वेन । घर्मवन्तमिति घर्म – वन्तम् ।

स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग – धेयेन । उप

धावति । धावति सः । स एव । एवास्मिन्न् । अस्मिन् ब्रह्मवर्चसम् ।

ब्रह्मवर्चसम् दधाति । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । दधाति

ब्रह्मवर्चसी । ब्रह्मवर्चस्येव । ब्रह्मवर्चसीति ब्रह्म – वर्चसी ।

एव भवति । भवतीन्द्राय । इन्द्रायार्कवते । अर्कवते पुरोडाशम् ।

अर्कवत इत्यर्क – वते । पुरोडाशमेकादशकपालम् ।

एकादशपालम् निः । एकादशकपालमित्येकादश – कपालम् ।

निर् वपेत् । वपेदन्नकामः । अन्नकामो ऽर्कः । अन्नकाम

इत्यन्न – कामः । अर्को वै । वै देवानाम् । देवानामन्नम् ।

अन्नमिन्द्रम् । इन्द्रमेव । एवार्कवन्तम् । अर्कवन्त७ स्वेन ।

अर्कवन्तमित्यर्क – वन्तम् । स्वेन भागधेयेन । भागधेयेनोप ।

भागधेयेनेति भाग – धेयेन । **36 (50/64)**

**<u>T.S. 2.2.7.3 - Kramam</u>**

उप धावति । धावति सः । स एव । एवास्मै । अस्मा अन्नम् ।

अन्नम् प्र । प्र यच्छति । यच्छत्यन्नादः । अन्नाद एव । अन्नाद

इत्यन्न – अदः । एव भवति । भवतीन्द्राय । इन्द्राय घर्मवते ।

घर्मवते पुरोडाशम् । घर्मवत इति घर्म – वते ।

पुरोडाशमेकादशकपालम् । एकादशकपालम् निः ।

एकादशकपालमित्येकादश – कपालम् । निर् वपेत् । वपेदिन्द्राय ।

इन्द्रायेन्द्रियावते । इन्द्रियावत इन्द्राय । इन्द्रियावत इतीन्द्रिय – वते ।

इन्द्रायार्कवते । अर्कवते भूतिकामः । अर्कवत इत्यर्क – वते ।

भूतिकामो यत् । भूतिकाम इति भूति – कामः । यदिन्द्राय ।

इन्द्राय घर्मवते । घर्मवते निर्वपति । घर्मवत इति घर्म – वते ।

निर्वपति शिरः । निर्वपतीति निः - वपति । शिर एव । एवास्य ।
अस्य तेन । तेन करोति । करोति यत् । यदिन्द्राय । इन्द्रायेन्द्रियावते ।
इन्द्रियावत आत्मानम् । इन्द्रियावत इतीन्द्रिय - वते । आत्मानमेव ।
एवास्य । अस्य तेन । तेन करोति । करोति यत् । यदिन्द्राय ।
इन्द्रायार्कवते । अर्कवते भूतः । अर्कवत इत्यर्क - वते । भूत एव ।
एवान्नाद्ये । अन्नाद्ये प्रति । अन्नाद्य इत्यन्न - अद्ये । प्रति तिष्ठति ।
तिष्ठति भवति । भवत्येव । एवेन्द्राय । इन्द्रायाꣳहोमुचे । **37 (50/61)**

**T.S. 2.2.7.4 - Kramam**

